# शिक्षाचार्य (एम्.एड्.)

## प्रवेशपरीक्षा - 2020 निर्देशिका

## राष्ट्रियसंस्कृतविद्यापीठम्

विश्वविद्यालयानुदानायोगेन श्रेणीकृतस्वायत्तता प्रदत्ता (प्रथमस्तरीयम्)

राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा “ए” श्रेण्या प्रत्यायितम् (द्वितीयचक्रम्)

**तिरुपतिः – ५१७ ५०७ आन्ध्रप्रदेशः**

**जालस्थानम् / Website : http://rsvidyapeetha.ac.in ; www.rsvpcet.in**

**Email : rsvpcet@gmail.com**

# विषयानुक्रमणिका


| क्र.सं. | विषयः | पृ.सं. |
|---|---|---|
| 1. | राष्ट्रियसंस्कृतविद्यापीठस्य  संक्षिप्तपरिचयः | 3 |
| 2. | शिक्षाचार्यप्रवेशपरीक्षायाः कृते न्यूनतमयोग्यता | 3 |
| 3. | शिक्षाचार्यपाठ्यक्रमे स्थानानि | 3 |
| 4. | शिक्षाचार्यपाठ्यक्रमाध्ययनशुल्कम् | 4 |
| 5. | शिक्षाचार्य - अध्ययनकेन्द्रम् उपलभ्यमानस्थानानि च - | 4 |
| 6. | आरक्षितस्थानानि | 4 |
| **7.** | आरक्षितश्रेणीनां कृते प्रमाणपत्राणि दातुं सक्षमाः अधिकारिणः | 5 |
| 8. | अत्यावश्यकसूचनाः | 5 |
| 9. | सद्यस्क-आवेदनार्थं निर्देशाः | 5 |
| 10. | सद्यस्क-आवेदनात् पूर्वं ध्यातव्यानि तथ्यानि | 5 |

# शिक्षाचार्य - (एम्.एड्.) प्रवेशपरीक्षा - 2020

## 1. राष्ट्रियसंस्कृतविद्यापीठस्य संक्षिप्तपरिचयः

### राष्ट्रियसंस्कृतविद्यापीठम् (मानितविश्वविद्यालयः), तिरुपतिः

आन्ध्रप्रदेशे तिरुमलपर्वतपादतले स्थितं राष्ट्रियसंस्कृतविद्यापीठं भारतसर्वकारेण घटितस्य संस्कृतायोगस्य अनुशंसानुसारं 1961 तमे वर्षे पारम्परिकसंस्कृतसाहित्यस्य आधुनिकशोधशैल्या प्रचारप्रसारार्थं तिरुपतौ संस्थापितम् । अप्रैल 1971 तमे वर्षे राष्ट्रियसंस्कृतसंस्थानस्य संरक्षणे एषा संस्था शिक्षामन्त्रालयस्य स्वायत्तसंस्थारूपेण प्रतिष्ठापिता । 1987 तमे वर्षे विश्वविद्यालय-अनुदान-आयोगस्य (यू.जी.सी.) अधिनियमानुसारं (1956) एतत् विद्यापीठं मानितविाश्वविद्यालयत्वेन घोषितम् । अत्र प्राक्-शास्त्रिः शास्त्री, आचार्य, विशिष्टाचार्य, विद्यावारिधिपर्यन्तम् अध्ययनार्थं, शिक्षाशास्त्री, शिक्षाचार्य, शिक्षायां शोधपाठ्यक्रमः अध्यापनार्थञ्च प्रशिक्षणसौकर्याणि उपलभ्यन्ते । सैषा संस्था राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा (नाक्) "ए" श्रेण्या CGPA 3.71 अङ्कैः प्रत्यायितेति (द्वितीयचक्रम्) ।

## 2. शिक्षाचार्यप्रवेशपरीक्षायाः कृते न्यूनतमयोग्यता

### (A) शैक्षिकयोग्यता

(i) अयं पाठ्यक्रमः द्विवर्षीयः यत्र कस्मादपि मान्यताप्राप्तविश्विवद्यालयात् शिक्षाशास्त्रि/बी.एड्. (संस्कृतशिक्षणसहितम्) आचार्यः / एम.ए. (संस्कृतम्) / समकक्षपरीक्षोत्तीर्णाः छात्राः प्रवेशार्हाः भविष्यन्ति ।

(ii) शिक्षाशास्त्रपरीक्षायाम् अथवा बी.एड्. (संस्कृतशिक्षणसहितायाम्) परीक्षायाम् सैद्धान्तिके प्रायोगिके च भागयोः पृथक् पृथक् न्यूनतमः 50% योगः, पूर्णयोगे च 50% अङ्काः अपेक्षिताः ।

(iii) अनुसूचितजाति/अनुसूचितजनजाति /अन्य अप्रगतिजातीयानाम् /अन्यथासक्षमवर्गीयाभ्यर्थिनां कृते पृथक् पृथक् सैद्धान्तिके प्रायोगिके च 45% अङ्काः अपेक्षिताः ।

(iv) शिक्षाचार्यपाठ्यक्रमे योग्यतासूच्यनुसारं वरीयताक्रमेण अपि भारतसर्वकारस्य तदा तदा नियमानुसारमेव आरक्षणानुसारं प्रवेशः प्रदास्यते ।

### (B) आयुः - सीमा

शिक्षाचार्यपाठ्यक्रमप्रवेशार्थं 01.10.2020 दिनाङ्कं यावत् अभ्यर्थी न्यूनातिन्यूनः द्वाविंशतिवर्षीयः (22) स्यात् । अस्मिन् विषये न किमपि शैथिल्यम् अनुमन्यते ।

### (C) चयनविधिः

शिक्षाचार्यकक्ष्यायां प्रवेशार्थम् अर्हताधारेण (शिक्षाशास्त्रिकक्ष्यायां प्राप्ताङ्काधारेण) साक्षात् चयनं भविष्यति । परं सर्वे प्रवेशार्थिनः अनिवार्यरूपेण सद्यस्क (ऑनलाईन) माध्यमेन आवेदनं कुर्युः एव । राष्ट्रियसंस्कृतविद्यापीठे प्रवेशार्थं अर्हाणां योग्यतासूची अखिलभारतीयस्तरे निर्मिता भविष्यति । प्रवेशार्हाणां सूची जालस्थाने (वेबसाईट) उद्घोषयिष्यते ।

## 3. शिक्षाचार्यपाठ्यक्रमे स्थानानि

एते निर्देशाः राष्ट्रियसंस्कृतविद्यापीठे शिक्षाचार्यपाठ्यक्रमप्रवेशाय वर्तन्ते। विद्यापीठस्य निर्धारितस्थानसंख्या अत्र उल्लिखिता ।

| क्रमाङ्कः | विश्वविद्यालयस्य नाम | शिक्षाचार्यपाठ्यक्रमे उपलब्धस्थानसंख्या |
|---|---|---|
| 1. | राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः | 55 |

## 4. अध्ययनशुल्कम्

| राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपति: |
|---|
| Rs.6000/- (प्रथमवर्षस्य) |
| Rs.6000/- (द्वितीयवर्षस्य) |

**अध्ययनशुल्कम्** – शिक्षा निश्शुल्करूपेण दीयते, तथापि प्रवेशसमये अभ्यर्थिभि: विद्यापीठस्य नियमानुसारं शुल्कं देयम् ।

**विविधव्यय:** – विद्यापीठे शिक्षकप्रशिक्षणविषयकसामान्यविविधव्यय: अभ्यर्थिना प्रदेय: ।

**छात्रावासव्यवस्था-** योग्यछात्राणां कृते छात्रावासव्यवस्था परिकल्प्यते । छात्रावासप्रवेशशुल्केन समं भोजनशालाशुल्कं पृथग्भवति।

## 5. शिक्षाचार्य - अध्ययनकेन्द्रम् उपलभ्यमानस्थानानि (कोष्ठके प्रदर्शितम्) च -

### अ. राष्ट्रियसंस्कृतविद्यापीठम् (मानितविश्वविद्यालय:), तिरुपति: (आन्ध्रप्रदेश:)

| क्र. सं. | विश्वविद्यालयस्य नाम | पत्रसंकेता: | एस.टि.डि. कूटाङ्क: | दूरभाषा संख्या |
|---|---|---|---|---|
| 1. | राष्ट्रियसंस्कृतविद्यापीठम् (मानितविश्वविद्यालय:) तिरुपति: (आ.प्र) (55) | राष्ट्रियसंस्कृतविद्यापीठम् तिरुपति: - 517 507 जनपदम् – चित्तूर (आ.प्र) | 0877 | आवाहक:, प्रवेशपरीक्षा -2288886<br>सङ्कायप्रमुख:, शिक्षासङ्काय- 2288886<br>वैद्युतीयपत्रसङ्केत: – rsvpcet@gmail.com |

### जम्मूसन्दर्भे सूचना

(i) एन.सी.टी.ई. पत्रसंख्या 49-21/2005 एन.सी.टी.ई./(एन् एण्ड एस्) दिनाङ्कित 31.5.2017 द्वारा सूचितम् अस्ति यत् जम्मूकश्मीरप्रशासनेन / यू.जी.सी. द्वारा मान्यताप्राप्तसंस्थाभ्य: / विश्वविद्यालयेभ्य: उपाधि / प्रमाणपत्रादिप्राप्तच्छात्रा: केन्द्रीयसर्वकारे राज्यसर्वकारे च नियुक्तये अधिकारिण: भविष्यन्ति ।

(ii) जम्मूकाश्मीरराज्यसंस्थाभ्य: उपाधिप्राप्ता: प्रवेशार्थिन: उच्चतमशिक्षासंस्थासु प्रवेशार्थं तत्तद्राज्य/विश्वविद्यालयस्य सम्बद्धनियमाधीना: भविष्यन्ति । एन.सी.टी.ई. अधिनियम: तै: सह सम्बद्ध: नास्ति ।

## 6. आरक्षितस्थानानि

भारतसर्वकारस्य नियमानुसृत्य आरक्षणव्यवस्था वर्तते, यथा -

- अनुसूचितजातीयानां कृते 15%
- अनुसूचितजनजातीयानां कृते 7.5%
- अन्य-अप्रगतिजातीयानां कृते 27%

**ध्यातव्यम्** – भारतशासनस्य/विश्वविद्यालयानुदानायोगस्य निर्देशानुसारेण अन्य-अप्रगतिजातीयानां छात्राणाम् अनुपलब्धौ सामान्यवर्गीयच्छात्रै: रिक्तस्थानानि पूरयिष्यन्ते ।

- आर्थिकदुर्बलवर्गस्य कृते (EWS) 10%
- दिव्याङ्गानाम् / प्रज्ञाचक्षुषां कृते 3%
- युद्धे / सैनिकसङ्घर्षे सशस्त्रसेनागत – हताहतानां विधवानाम् /अपत्यानाम् कृते 3%

**(प्रमाणपत्रे हताहतावस्थाविषये स्पष्ट उल्लेख: अपेक्षित: )**

- क्रीडालूनां कृते (राष्ट्रिय-अन्ताराष्ट्रियस्तरे स्पर्धासु प्रतिभागस्य कृते) 2%

उपर्युक्तकोटिषु यदि कश्चिदावेदक: स्यात्तर्हि तेन विद्यापीठे प्रवेशकाले अर्हताया: प्रमाणपत्रं राजपत्रिताधिकारिभि: (Gazetted) प्रमाणीकृत्य आवेदनेन सह प्रस्तोतव्यम् । अन्यथा प्रवेशार्हता निरस्ता भविष्यति । एतादृशानां छात्राणामभावे रिक्तस्थानानि सामान्यै: प्रार्थिभि: वरीयताक्रमेण पूरयिष्यन्ते । आरक्षणनिर्धारणं केन्द्रीयस्तरे एव भविष्यति ।

## 7. आरक्षितश्रेणीनां प्रमाणपत्रदातारः अधिकारिणः

i. अनुसूचितजाति/अनुसूचितजनजाति/अप्रगतजाति/आर्थिकदुर्बलवर्गाणां कृते-जिल्लाधीश / उपजिल्लाधीशः (एस.डी.एम.) / तहसीलदारः।

ii. अन्यथासक्षमाणां / प्रज्ञाचक्षुषां कृते सर्वकारीयचिकित्सालयस्य प्रधानचिकित्साधिकारी ।
**(40 प्रतिशतविकलाङ्गता ततोऽधिका वा अर्हताऽधिकृता) ।**

iii. सशस्त्रसेनानां कृते सचिवः – सैनिकः / नाविक / वायुसेनासङ्घटनम्

## 8. अत्यावश्यकसूचनाः

1. एषा निर्देशिका ध्यानेन अध्येतव्या ।
2. अस्यां प्रवेशविषयिकाः आवश्यकसूचनाः सङ्कलिताः ।
3. सद्यस्क-आवेदनं ध्यानेन पूरणीयम् ।
4. सद्यस्क-आवेदने लिखितानां तथ्यानां सत्यापनं प्रवेशसमये भविष्यति ।
5. कस्यचित् तथ्यस्य असत्यत्वे प्रमाणिते सति, यथानियमं न्यायिकदण्डः, प्रवेशनिरस्तीकरणम् इत्यादिकं यथायोग्यं प्रकल्पयिष्यते ।
6. सद्यस्क-आवेदने छायाचित्रं स्पष्टं नवीनतमं च स्यात् । प्रवेशसमये यदि छायाचित्रस्य मेलनं न भविष्यति तर्हि प्रवेशनिरस्तीकरणं यथानियमं न्यायिकदण्डव्यवस्था अपि करिष्यते।
7. **अभ्यर्थिना प्रदत्ता चलदूरवाणीसंख्या प्रवेशप्रक्रियासमाप्तिपर्यन्तं स्थापनीया, यतः प्रवेशसम्बन्धिन्यः सर्वाः सूचनाः प्रदत्तायाः चलदूरवाणीसंख्यायाः कृते एव प्रेष्यन्ते ।**

## 9. सद्यस्क-आवेदनार्थं निर्देशाः

प्रार्थिना प्रवेशार्थं विधीयमानम् आवेदनम् सद्यस्कमाध्यमेन राष्ट्रियसंस्कृतविद्यापीठस्य जालस्थानतः कर्तुं शक्यते। सद्यस्कनिमित्तं सङ्केताः प्रथमपुटे उल्लिखिताः । त्रुटिपूर्णम्, अपूर्णं, निश्चिततिथेरनन्तरम् कृतम् आवेदनं न स्वीकरिष्यते । चिताः प्रार्थिनः एव वरीयताक्रमेण तत्तत्पाठ्यक्रमे राष्ट्रियसंस्कृतविद्यापीठे प्रवेशार्हाः भविष्यन्ति । इयं वरीयतासूची केवलं 2020 संवत्सरस्य कृते एव मान्या भविष्यति ।

**सैषा निर्देशिका सावधानतया पठनीया, स्वकीयपात्रताया अवबोधनानन्तरमेव अभ्यर्थिना सद्यस्क-आवेदनं करणीयम् । एकतः अधिकानि प्रपूरितानि सद्यस्क-आवेदनानि प्रवेशपात्रतां निरस्तां कारयिष्यन्ति ।**

सद्यस्क-आवेदने अधुनातनानि दिनाङ्कांकितानि पासपोर्ट (Passport) आकाराणि छायाचित्राणि हस्ताक्षरञ्च नियोजनीयम् ।

## 10. सद्यस्क-आवेदनात् पूर्वं ध्यातव्यानि तथ्यानि

i. केवलमर्हप्रार्थिभिः प्रवेशप्रक्रियायां सम्मिलितैर्भाव्यम् ।

ii. शिक्षाचार्यपाठ्यक्रमः एन.सी.टी.ई. द्वारा मान्यताप्राप्तः अस्ति । निर्धारितसंख्यानुसारं योग्यताक्रमानुसारेण एव प्रवेशः प्रकल्पयिष्यते ।

iii. प्रवेशार्हतापरिशीलनम्, आरक्षणादीनां निश्चयश्च, एतत्सर्वं राष्ट्रियसंस्कृतविद्यापीठस्य अधीनं वर्तते ।

iv. प्रवेशविषये राष्ट्रियसंस्कृतविद्यापीठस्य कुलपतेः निर्णय एव अन्तिमः ।

v. न्यायिकविषयेषु अमरावती (आन्ध्रप्रदेशः) उच्चन्यायालयस्य एव क्षेत्राधिकारः भविष्यति ।

vi. राष्ट्रियसंस्कृतविद्यापीठे शिक्षाचार्यपाठ्यक्रमे प्रवेशसमयेऽपि मुद्रितं सद्यस्कावेदनपत्रम् आनयेत्।

,,,,,